संस्कृत-वार्ता:

25.06.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- भारतीय-जनता-पार्टीति दलस्य वरिष्ठ: सांसद: ओम् बिडला एनडीए इति राष्ट्रिय-जनतांत्रिक-संयुते: लोकसभाध्यक्ष पदाय प्रत्याशी भविष्यति। विपक्षि संयुत्या अपि के.सुरेश: प्रत्याशीकृतो वर्तते।
- अष्टादश्या: लोकसभाया: द्वितीय-दिवसस्य शुभारम्भ: सदने निर्वाचितानां नूतनानां सांसदनां निरन्तरं शपथग्रहणेन साकं सञ्जात:।
- दिल्ल्या: मुख्यमन्त्री अरविन्दकेजरीवाल: कारागृहे एव स्थास्यति। यतो हि दिल्ली उच्चन्यायालयेन धन-शोधन-प्रकरणे तस्य मुक्ति-याचिका निरस्तीकृता।
- विकिलीक्स इत्यस्य संस्थापक: जूलियन असांजे इत्येष: अमरीकादेशीयै: अधिकारिभि: सह पारस्परिक-सहभागित्वस्य अनन्तरं ब्रिटेनदेशस्य कारावासत: विमोचित:।
- आई.सी.सी. इति अन्ताराष्ट्रिय क्रिकेट परिषद: विंशतिं प्रति विंशति: विश्व-चषकीय-स्पर्धायोजनस्य उपान्त्यचक्रीया: प्रतिस्पर्धा: निश्चप्रचं सञ्जाता: सन्ति।

<u>लोकसभाध्यक्ष प्रत्याशी</u>

भारतीय-जनता-पार्टीति दलस्य वरिष्ठ: सांसद: ओम् बिरला एनडीए इति राष्ट्रिय-जनतांत्रिक-संयुते: लोकसभाध्यक्ष-पदाय प्रत्याशी भविष्यति। अपरत्र च विपक्षि-संयुत्या अपि लोकसभाध्यक्ष-पदार्थं कांग्रेस-दलस्य सांसद: के.सुरेश: प्रत्याशीकृतो वर्तते। ध्येयमस्ति यत् ओम् बिरला विगते सत्रेऽपि लोकसभाध्यक्ष: आसीत्। अद्य उभाभ्यामपि प्रत्याशिभ्याम् अध्यक्ष-पदार्थं निज-निज-नामांकनं भरितम्। अध्यक्षस्य प्रचयनं श्व: भविष्यति। अत: प्राक् प्रशासनं विपक्षश्च अस्मै पदाय सर्वसहमतिं यावत् प्राप्तुं नैव पारितवन्तौ। संसद: बहिस्तात् सञ्चारं माध्यमै: साकं संवदता केन्द्रीय-मन्त्रिणा पीयूष-गोयलेन प्रोक्तं यत् अस्मिन् विषये केन्द्रीय-मन्त्रिण: राजनाथसिंह:, अमित-शाह: जगत्-प्रकाशनड्डश्च कांग्रेस-दलस्य नेत्रा के.सी.गोपालेन, डी.एम.के. दलस्य नेता टी.आर.बालू इत्यमुना च साकम् उपवेशनं समाचरितवन्त:। विपक्षस्य नेतार: श्री ओम-बिडला वर्याय समर्थन-प्रदानात् पूर्वम् उपाध्यक्षस्य नाम्नो घोषणार्थं बलं प्रयच्छन्त: आसन्। श्रीगोयलेन भणितं यत् ते विपक्षिण: संसूचिता: सन्ति यत् उपाध्यक्ष-पद-घोषणा-प्रकरणं अध्यक्ष-निर्वाचन-समये समाधास्यते। अमुना प्रतिपादितं यत् विपक्षिभि: ये समया: उपस्थापिता: सन्ति ते समेऽपि समया: सर्वकारेण पूर्वमेव निराकृता: सन्ति। अस्माकं वार्ताहरो वर्णयति यत् लोकसभाया: अध्यक्षस्य निर्वाचनं स्वाधीनता-कालादेव विनैव प्रतिस्पर्धया संपाद्यते, किन्तु ऐदम्प्राथम्येन अस्मै पदाय निर्वाचनं विधीयते।

## लोकसभा-शपथग्रहणम्

अष्टादश्या: लोकसभाया: द्वितीय दिवसस्य शुभारम्भ: सदने निर्वाचितानां नूतनानां सांसदनां शपथग्रहणेन साकं सञ्जात:। कांग्रेस दलस्य गोवाल कागडा पदवीत्यमुना हिन्दी भाषया शपथग्रहणं कृतम्। तत्रैव सांसद: बच्छव शोभा, मराठी भाषया शपथम् अभिस्व्यकरोत्। भारतीय जनता पार्टीति दलस्य सांसदया स्मिता उदया वाघ वर्यया मराठी भाषया शपथो गृहीत:। अपरत्र च अनूप सञ्जय धोत्रे, कांग्रेसस्य बलवन्त दौलत बारवे, शिवसेनादलस्य डॉ. श्रीकान्त एकनाथ-शिन्दे, शिवसेनाया: नरेश-गणपत महस्के सहिता: अन्येऽपि नैके सांसदा: शपथग्रहणं स्वीकृतवन्त:। ध्येयमस्ति यत् विगत-दिनात् नवनिर्वाचितानां सांसदानां शपथ-ग्रहण-समारोह: प्रवर्तमान: अस्ति। अत्रान्तरे गतदिने षट्षष्ट्युत्तर-द्वि-शत-मितै: सांसदै:, अन्यैश्च अद्य शपथ: स्वीकृत:, अवशिष्टा: सांसदा: श्वस्तने शपथ-वचनं स्वीकरिष्यन्ति।

## केजरीवाल: मुक्ति:

दिल्ल्या: मुख्यमन्त्री अरविन्दकेजरीवाल: कारागृहे एव स्थास्यति। यतो हि दिल्ली उच्चन्यायालयेन धन-शोधन-प्रकरणे तस्य मुक्ति याचिका निरस्तीकृता। न्यायमूर्तिना सुधीरकुमारजैनस्य एकेन अवकाशपीठेन प्रवर्तननिदेशालयस्य तस्यां याचिकायां निजादेश: प्रख्यापित: यस्यां केजरीवालाय मुक्ति-प्रदानस्य निम्न-न्यायलयस्य आदेशं रोद्धुं अभ्यर्थनं कृतमासीत्। अवधेयं वर्तते यत् अरविन्द-केजरीवाल: दिल्ल्या: मद्यनीति-सम्बद्ध-प्रवञ्चनायां मार्चमासस्य एकविंशे दिनांके निगडित: आसीत्। मईमासे लोकसभानिर्वाचन-प्रचाराय सर्वोच्चन्यायालयेन तस्य अल्पावधिक-मुक्तियाचिका स्वीकृतासीत्। तदनु असौ जूनमासस्य द्वितीये दिवसे कारागृहं प्रति प्रत्यावर्तितवान्।

## प्रधानमन्त्री-आपत्काल:

प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना पञ्च-सप्तत्युत्तर-एकोन-विंशति: शत-तमे वर्षे आपत्काल-प्रवर्तनस्य विरोध-कर्तृभ्य: सर्वेभ्य: जनेभ्य: श्रद्धाञ्जलि: समर्पित:। एकस्मिन् सामाजिक-सञ्चार-सञ्जालीये सन्देशे श्रीमोदिना व्यलेखि यत्-एतद् दिनं स्मारयति यत् कथंकारं कांग्रेस-दलेन जनानाम् आधारिक-स्वतन्त्रता नष्टं नीता आसीत्। देशस्य संविधानञ्च पादतले विमर्दितम् आसीत्। अमुना प्रोदितं यत् तात्कालिक-कांग्रेस-शासनेन समेऽपि लोकतान्त्रिका: सिद्धान्ता: अवहेलिता: देशश्च कारागृहत्वेन परिवर्तित:। अमुना भणितं यत् इमे त एव जना: सन्ति यै: नैकेषु अवसरेषु षट् पञ्चाशदुत्तर-त्रिशत-तम: अनुच्छेद: प्रवर्तित: आसीत्। सञ्चार माध्यमानां स्वाधीनताया: अपहरणार्थं विधेयकानि प्रस्तावितानि संघवादश्च विनाशित:, संविधानस्य सर्वेऽपि नियमा: उल्लंघिता:।

## विकिलीक्स

विकिलीक्स इत्यस्य संस्थापक: जूलियन असांजे इत्येष: अमरीका-देशीयै: अधिकारिभि: सह पारस्परिक-सहभागित्वस्य अनन्तरं ब्रिटेनदेशस्य कारावासत: विमोचित:। असांजे इत्येष: राष्ट्रिय-रक्षा-सूचनाया: प्राप्ते: तस्या: च उद्घाटनस्य षडयन्त्रस्य आपराधिक-आरोपेषु दण्डितो जात: आसीत्। पञ्चवर्षाणां कारावासानन्तरम् अस्मै लंदनस्य उच्चन्यायालयेन मुक्ति: प्रदत्ता अस्ति।

## वित्तमन्त्री निर्मला सीतारामन्

वित्तमन्त्री श्रीमती निर्मला-सीतारामन् अद्य नवदिल्ल्यां व्यापार-सेवा-क्षेत्रस्य प्रतिनिधिभि: साकं सप्तम-वित्त-संकल्पना-पत्रकस्य प्रस्तवनात् पूर्वं परामर्शोपवेशनम् आचरितवती। एतत् परामर्श-मन्त्रणोपवेशनं मन्त्री-वर्यया एव अध्यक्षितम् आसीत्। उपवेशने केन्द्रीय-वित्त-राज्य-मन्त्री पंकज चौधरी, मुख्य-आर्थिक-परामर्शदाता वी.अनन्त नागेश्वरन्, वित्त-सचिव: टी.वी.सोमनाथन्, व्यय-विभागीय: सचिव:, आर्थिक-कार्य-विभागस्य च सचिव: वाणिज्योद्योग-मन्त्रालयश्च सहभागं कृतवन्त:। ध्येयमस्ति यत् सीतारामन् वर्यया अत: पूर्वं व्यापारिकाणां श्रमिकाणां च संघानां प्रतिनिधिभि: साकमपि परिचर्चोपवेशनम् आचरितम् असीत्।

## जोशी-संगोष्ठी

केन्द्रीय-उपभोक्तृ-कार्य-खाद्य-वितरणमन्त्री प्रह्लादजोशी इक्षु-दण्डस्य स्थायितापूर्वकं विविधोत्पादन-कृते वैश्विकसहयोगं समाहूतवान्। दिल्ल्यां अन्ताराष्ट्रिय-इक्षु-संघटन-परिषद: चतुष्षष्टितमे उपवेशनावधौ एकस्यां कार्यशालायां श्रीजोशी समुदीरितवान् यत् कस्याश्चिदपि योजनाया: कार्यान्वयने निष्पादने च उपभोक्तृणां-कृषकाणां-उद्योगानां च कल्याणेषु सामञ्जस्य स्थापनम् अत्यावश्यकं वर्तते। वार्ताहरै: सह सम्भाषमाण: श्रीजोशी कथितवान् यत् भारतम् अन्ताराष्ट्रिय-इक्षु-संघटनस्य उपवेशनस्य आतिथ्यं द्वादशवर्षाणां दीर्घकालाद् अनन्तरं निर्वहति। एतस्मिन्नुपवेशने कृषकाणां, उपभोक्तृकल्याणे जलसंरक्षणे च प्रारम्भिकस्तरे विचार-विमर्श: भविष्यति।

## एनटीए

राष्ट्रिय-परीक्षा-अभिकरणस्य परीक्षासु पारदर्शिताम् निष्पक्षताम् च सुनिश्चेतुं शिक्षा-मन्त्रालयेन निर्मितायाः उच्च-स्तरीय-विशेषज्ञ-समित्याः प्रथमोपवेशनं ह्यः अभवत्। नवदेहली-नगरे संचार माध्यमै: सह वार्तालापं कुर्वन् समित्या: अध्यक्ष: डॉ. के. राधा कृष्णन् अवदत् यत् समित्याः प्राथमिकता छात्र- अभिभावकानां च परामर्शाणां प्राप्ति: तेषां चिंता निराकरणं च अस्ति। छात्राणां मातृपितृणां च कृते समितिः तेन सह कार्यं करिष्यति। डा. राधाकृष्णन्-वर्यः अवदत् यत्, समितिः छात्राणां कष्टानि, चिंतां च न्यूनीकर्तुं दृढं, अव्यवस्थितां च व्यवस्थां विकसयितुं अपि विचारयति।

## भारतर्तु-विज्ञानम्

अद्य उप-हिमालयीय पश्चिमबंगाले सिक्किमे च अत्यधिकवृष्टि: सम्भाव्यते। भारतर्तु-विज्ञान-विभागेन आगामिषु चतुर्षु पञ्चसु च पश्चिमीयतटेषु पूर्वोत्तरभारते च महती वृष्टि: अनुमानिता। विभागनेन सूचितं यत् राष्ट्रिय-राजधान्यां नवदिल्ल्यां अगिमेषु षड्दिवसेषु अल्पवृष्टि: भविष्यति। पञ्जाब-हरियाणा-पश्चिमोत्तर-प्रदेश-बिहार-राज्यानां केषुचित् भागेषु उष्णवायुप्रवाह: प्रवर्तिष्यते।

## आईसीसी-टी-20

आई.सी.सी. इति अन्ताराष्ट्रिय क्रिकेट परिषद: विंशतिं प्रति विंशति: विश्व-चषकीय-स्पर्धायोजनस्य उपान्त्यचक्रीया: प्रतिस्पर्धा: निश्चप्रचं सञ्जाता: सन्ति। प्रथमे द्वन्द्वे भारतस्य स्पर्धा विगत-विजेतृ-दलेन इंग्लैण्ड-देशेन साकं बृहस्पति-वासरे ग्याना-क्रीडांगणे भविष्यति। द्वितीये उपान्त्य-चक्रीये द्वन्द्वे दक्षिणाफ्रीका-अफगानिस्तान-देशौ मुखामुखि भविष्यत:। ध्येयमस्ति यत् अफगानिस्तानम् ऐदम्प्राथम्येन क्रीडा-श्रृंखलाया: उपान्त्यचक्रं प्राप्तम् अस्ति।

।। इति वार्ता: ।।